# ShaTpa nchAshikA

# ષટ્પઞ્ચાશિકા

## Document Information

Text title : ShaTpanchAshikA

File name : ShaTpanchAshikAVS.itx

Category : major_works, vAsudevAnanda-sarasvatI, vedanta

Location : doc_z_misc_major_works

Author : vAsudevAnandasarasvatI TembesvAmi

Proofread by : Sunder Hattangadi

Description-comments : From stotrAdisangraha

Latest update : December 31, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# ષટ્પઞ્ચાશિકા

આત્મા સચ્ચિત્સુખો દત્તો રક્તોષ્ણાકાશદીપવત્ ।
માયાબ્ધિનૌર્દૃઢાઽસઙ્ગા તદ્ભક્તિર્ન તથા પ્લવઃ ॥ ૧॥

ભવાધ્વતાપશ્રાન્તસ્ય સીતારામઃ સમાશ્રયઃ ।
યથાધ્વતાપશ્રાન્તસ્ય શીતારામઃ સમાશ્રયઃ ॥ ૨॥

ભવામ્બુધિનિમગ્નસ્ય તારિણી ભગવત્કથા ॥

યથામ્બુધિનિમગ્નસ્ય તરણિર્વિધિચોદિતા ॥ ૩॥

ભવતાપાભિતપ્તસ્ય શરણં ન ગુરોઃ પરમ્ ।
દવતાપાભિતપ્તસ્ય શરણં ન ધનાત્પરમ્ ॥ ૪॥

રોચતે સુવિરક્તસ્ય ન સાંસારિકપુઙ્કથા ।
યથા પિત્તજ્વરાર્તસ્ય સુરસાન્નાદિસત્કથા ॥ ૫॥

શૃણોતિ સર્વં સન્ન્યસ્ય શ્રુતિવાર્તાં સ આદરાત્ ।
પરવ્યસનિની નારી જારવાર્તાં યથાઽઽદરાત્ ॥ ૬॥

કથઞ્ચન ત્યજેન્નૈવ વિવેકી શાન્તિગેહિનીમ્ ।
યથા કામસન્તપ્તોઽવિવેકી કાન્તગેહિનીમ્ ॥ ૭॥

મુક્તિર્ન સુલભાઽધ્યાસભાતનાનાત્વદર્શિનઃ ।
આદર્શબિમ્બિતાનેકદ્વારદર્શિશિશોરિવ ॥ ૮॥

ધીમાઞ્છમાદિસમ્પન્નઃ સદ્ગુરૂક્ત્યા લભેત્પદમ્ ।
ચોરૈસ્ત્યક્તો વને યદ્વત્તદભિજ્ઞગિરા નરઃ ॥ ૯॥

ભવાન્ભૂમેત્યકર્તાત્મત્વં વ્રજેત્સદ્ગુરોર્ગિરા ।
ભિલ્લપાલિતરાટ્પુત્ર આપ્તોક્ત્યા રાજતામિવ ॥ ૧૦॥

કૂટસ્થસચ્ચિદાનન્દતનોર્બન્ધવિમોચને ।
પુત્રસ્ય જાતિવન્ધ્યાયા ઇવ જન્મોત્સવાત્યયૌ ॥ ૧૧॥

વાચારમ્ભણમાત્રં ચિત્તનૌ વિશ્વં ન ચાપરમ્ ॥

વસ્ત્વન્તરં યથા ધ્વાન્તે રજ્જૌ સર્પવિસર્પણમ્ ॥ ૧૨॥

વિષયગ્રહણેચ્છા તુ સ્વાત્મવિજ્ઞાનતઃ પુરા ।
અજ્ઞસ્ય શુક્તિવિજ્ઞાનાત્પુરેવ રજસસ્પૃહા ॥ ૧૩॥

ભ્રમમાત્રમસદ્વિશ્વં જ્ઞાતં ચેત્તેન કઃ સુખી ।
કો નામ શુક્તિરૌપ્યેણ જાતો ધનસમૃદ્ધિમાન્ ॥ ૧૪॥

જગદસ્તિત્વવાદો ન સ્વાત્મજ્ઞાને પ્રકાશિતે ।
ધ્વાન્તે સ્થાણૌ પિશાચાદિભ્રાન્તિર્દીપ ઇવાહૃતે ॥ ૧૫॥

આશ્ચર્યમેતદ્વિશ્વં ન પુરાધોર્ધ્વં ન ભાતિ ચેત્ ।
ભાતુ નામેન્દ્રજાલાભં ચિદાત્મનિ તુ માયયા ॥ ૧૬॥

અસઞ્જેજ્જ્ઞસ્ય નેતોઽપિ વ્યવહારઃ ક્ષણં કુતઃ ।
નાયં દોષોઽપિ જાનન્સન્નિન્દ્રજાલં હિ વીક્ષતે ॥ ૧૭॥

એકોઽપિ સન્નયં ભૂમા માયયા ભાત્યનેકવત્ ।
પુંસો યથાક્ષિદોષેણ ચન્દ્ર એકો દ્વિતીયવત્ ॥ ૧૮॥

આત્મોપાધિવશાદ્ભાતિ નિશ્ચલોઽપિ હિ ચઞ્ચલઃ ।
વિકારી નિર્વિકારોઽપિ જલોપાધિગતાર્કવત્ ॥ ૧૯॥

નિત્યં ભ્રમાદિવાભાતિ માયાભ્રમવિજૃમ્ભિતમ્ ।
જગચ્ચક્રં યથાઽલાતચક્રં ભ્રાન્તદૃશેરિહ ॥ ૨૦॥

વિદ્યોતતે નાત્મવિદ્યા યાવત્તાવચ્ચિદમ્બરે ।
વિવિધં ભાતિ વિશ્વં ખે ગન્ધર્વનગરં યથા ॥ ૨૧॥

આરોપિતજગદ્બાધ આત્મૈકઃ પરિશિષ્યતે ।
શત્રૂન્હત્વાખિલાન્યુદ્ધે મહાવીરો યથૈકકઃ ॥ ૨૨॥

વિક્ષેપઃ શિષ્યતે માયાવરણેઽપિ વિદ્યાતિતે ।
ઉપાદાને વિનષ્ટેઽપિ કાર્યં તિષ્ઠતિ હિ ક્ષણમ્ ॥ ૨૩॥

સમે પ્રારબ્ધભોગેઽપિ જ્ઞાની ક્લિશ્યતિ નાજ્ઞવત્ ।
સમેઽપ્યધ્વશ્રમેઽધ્વજ્ઞો દૈન્યં નૈતિ યથાજ્ઞવત્ ॥ ૨૪॥

પતત્વદ્ય યુગાન્તે વા વપુર્મુક્તસ્ય ચિત્તનોઃ ।
કુમ્ભે ભગ્ને સ્થિતે વા દ્યોર્હાનિલાભૌ કુતસ્તતઃ ॥ ૨૫॥

સઙ્કલ્પમાત્રં વિશ્વં સદ્ભાતિ મન્દમતેર્યથા ।
સઙ્કલ્પમાત્રભાતા સ્ત્રી સત્યા વિરહિણો ભ્રમાત્ ॥ ૨૬॥

સ્વસ્વરૂપસ્થિતૌ સત્યાં દુઃખં નૈવ સુખાત્મનિ ।
યથા વાસ્યાદિકે ત્યક્તે કષ્ટં ત્વષ્ટરિ નૈવ તત્ ॥ ૨૭॥

નાધ્યાત્મિકાદિછિન્નોઽપિજાત્વેકરસતાં વિભુઃ ।
ત્યજત્યાત્મા યથા લોકે પટતાં ચિત્રિતઃ પટઃ ॥ ૨૮॥

કામં સૃજતુ કૂટસ્થે માયા વિશ્વં ચિદમ્બરે ।
નાસ્ય લાભો ન વા હાનિર્વર્ષત્યાબ્દે યથા દિવઃ ॥ ૨૯॥

કરણવ્યવહારૈસ્તુ કૂટસ્થાત્મા ન લિપ્યતે ।
ન લિપ્યતે યથા કૂટો લોહાનામપિ તાડનૈઃ ॥ ૩૦॥

તત્તન્મય ઇવાભાતોઽપ્યાત્મા કોશેભ્ય ઉત્તરઃ ।
તેભ્યો વિવેચિતઃ શુદ્ધઃ સ્ફટિકો રઙ્ગતો યથા ॥ ૩૧॥

મુક્તાત્મા વ્યવહારેઽપિ સ્થિતસ્તેન ન લિપ્યતે ।
અસઙ્ગત્વાત્તતોઽન્યત્વાત્પદ્મપત્રમિવામ્ભસા ॥ ૩૨॥

દેહાદિતાપતપ્તોઽહમિતિ ધીરવિવેકિનઃ ।
પુત્રદારેષુ તપ્યત્સુ તપમીતિ મતિર્યથા ॥ ૩૩॥

સચ્ચિદાનન્દરૂપોઽહમેવં નિશ્ચયવાનપિ ।
મર્ત્યોઽસ્મીતિ કદાચિદ્દિગ્ભ્રમવન્મનુતે ક્ષણમ્ ॥ ૩૪॥

નિરાકૃત્ય ત્યજેદ્વિશ્વં સારમાસ્વાદ્ય નીરસમ્ ।
યથા ત્યજતિ નિઃસારં ફલં સ્વાદુ રસં પિબન્ ॥ ૩૫॥

નાત્યન્તાસન્નમાત્માનં મૂઢઃ પશ્યતિ દુષ્ટદૃક્ ।
યથા દિવાન્ધ ઉદિતમર્કં લોકપ્રકાશકમ્ ॥ ૩૬॥

વિભાવ્યાજ્ઞોઽન્યં પ્રપઞ્ચં સુખં ચાપિ બિભેતિ યઃ ।
દીપાદિતા દૃશ્યમાનાં સ્વચ્છાયામિવ બાલકઃ ॥ ૩૭॥

માયા ખાદિવિકારૈર્ન બ્રહ્માન્યથયિતું ક્ષમા ।
વિમલં ખં યથાઽધ્યસ્તધર્મા મલિનતાદયઃ ॥ ૩૮॥

વ્યભિચારિસુષુપ્ત્યાદિદશા બુદ્ધિગુણોદિતાઃ ।
બુધે સ્વીયા ન નિર્મોકા યથા સર્પગુણોદિતા ॥ ૩૯॥

વ્યવહારોઽઙ્ગસાપેક્ષઃ પ્રો(?જ્ઞો) જાગ્રદિતીક્ષિતુઃ ।
ગૃહિણો ગેહસાપેક્ષબાહ્યાન્તર્વ્યવહારવત્ ॥ ૪૦॥

યસ્ય નિદ્રા સમાધિર્વા સુખા સર્વોપસંહૃતિઃ ।
વ્યાપારકુલિતસ્યેવ સુખા સર્વોપસંહૃતિઃ ॥ ૪૧॥

કામં કરોતુ વિધિતો મુક્તઃ કર્તાસ્ય તેન કિમ્ ।
સ્તોકાભ્રચ્છાદિતોઽર્કો યો રાહુગ્રસ્તો ભવેત્સ કિમ્ ॥ ૪૨॥

મિથ્યાજગત્સમુલ્લાસાત્પ્રબુદ્ધસ્ય કથં ભયમ્ ।
વ્યાઘ્રાદીન્પશ્યતઃ સ્વપ્રાત્પ્રબુદ્ધસ્ય કથં ભયમ્ ॥ ૪૩॥

આદેયાત્મનિરીક્ષાર્થમનાત્મધિયમુજ્વલામ્ ।
યથાઽઽસ્યહીનમુકરો મુખસૌન્દર્યવીક્ષણે ॥ ૪૪॥

ક્રમેણ વર્ધમાનેઽન્તર્બોધે હાર્દતમઃક્ષયઃ ।
કલાભિર્વર્ધમાનેઽબ્જે યથા નૈશતમઃક્ષયઃ ॥ ૪૫॥

પ્રાજ્ઞોઽપિ બોધિતોઽન્તર્દૃગ્જાનાત્યન્યન્ન કિઞ્ચન ।
ગ્રાસે ગ્રાસે બોધિતોઽપિ નિદ્રાણ ઇવ બાલકઃ ॥ ૪૬॥

સ્વાનુભૂતિરસાસ્વાદે વિષયા વિરસા વિદઃ ।
યથાઽઽરનાલં વિરસં પરમામૃતપાયિનઃ ॥ ૪૭॥

પૂર્વાભ્યાસસમાધિં જ્ઞો વાઞ્છત્યાત્માખિલાત્મનઃ ।
કાલાત્યયાય રાજેવ સુસમૃદ્ધોઽપિ દેવનમ્ ॥ ૪૮॥

નાઽઽનન્દયતિ વિધ્યાદિ નિસ્ત્રૈગુણ્યાધ્વચારિણમ્ ।
નિર્વ્યાપારાલસનરં દેશિકા દેશિનં યથા ॥ ૪૯॥

ચિન્તયાનોઽપિ તત્ત્વં સ્વં સ્વચ્છન્દો ન નિયમ્યતે ।
સામ્રાજ્યગં સ્વતન્ત્રં ચ પ્રજાભિરિવ રાટ્સુતઃ ॥ ૫૦॥

પરમાર્થદૃશઃ ક્વાપિ નેષ્ટાનિષ્ટે શુભાશુભે ।
વૃષ્ટ્યાઽવૃષ્ટ્યાઽપ્પૂરસ્થસસ્યવૃદ્ધિક્ષયાવિવ ॥ ૫૧॥

શ્રુત્યાદ્યાવૃત્તિયોગાગ્ન્યુજ્વલિતઃ પૂર્વરૂપભાક્ ।

જીવ આત્મૈવ ચાગન્તુમલદાહે સુવર્ણવત્ ॥ ૫૨॥

કીટભ્રમરદૃષ્ટ્યા ન ચિત્રં સ્વધ્યાનતઃ સ્વતા ।
નામરૂપોપાધ્યપાયે સત્યૈક્યં સરિદબ્ધિવત્ ॥ ૫૩॥

ચિત્રપ્રાપઞ્ચિકૈશ્વર્યં તત્ત્વજ્ઞં રઞ્જયેત્કથમ્ ।
હાવૈઃ સ્ત્રીવેષધૃક્સ્વજ્ઞાહૃદુન્મથયતીહ કિમ્ ॥ ૫૪॥

જ્ઞાની ક્ષીણાન્યકર્માપિ પ્રારબ્ધં સહતેઽવશી ।
વ્યાલગ્રાહી ગૃહીતાહિર્યથા તત્કૃતપીડનમ્ ॥ ૫૫॥

પ્રાપ્તકામં સ્થિતપ્રજ્ઞં સ્વયં કામા વિશન્તિ તૈઃ ।
શાન્તો નોત્સર્પતિ યથા પૂર્ણાબ્ધિરચલામ્બુભિઃ ॥ ૫૬॥

યા ષટ્પઞ્ચાશિકા વાસુદેવાનન્દીયમુદ્ધૃતા ।
વાનવાસીપુરિ તયા પ્રીયતામત્રિનન્દનઃ ॥ ૫૭॥

શ્રી પરમપૂજનીય શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતા
ષટ્પઞ્ચાશિકા સમ્પૂર્ણા ॥

Proofread by Sunder Hattangadi

---

*ShaTpa nchAshikA*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*